तस्मात् प्रक्षाणि पाक्षाणि ददानि तव पुत्रक ॥"
अस्य प्रमाणं यथा, हलायुधे ।
"चतुर्विंशत्यङ्गुलो हस्तश्चतुर्हस्तं धनुः स्मृतम् ।
तद्वेत्मानं चापं सर्व्वलक्षणसंयुतम् ॥"
तथा आग्नेयधनुर्व्वेदे ।
"चतुर्हस्तं धनुः श्रेष्ठं त्रिभिः सार्द्धैस्तु मध्यमम् ।
कनिष्ठन्तु त्रिभिः प्रोक्तं नित्यमेव पदातिनः ॥"
धनुस्तु शार्ङ्गवांशभेदेन द्विविधम् । यथा, युक्तिकल्पतरौ ।
"धनुस्तु द्विविधं प्रोक्तं शार्ङ्गं वांशं तथैव च ।"
एतयोः प्रकारमाह धनुर्व्वेदे ।
"शार्ङ्गिकं त्रिणतं प्रोक्तं वैणवं सर्व्वगामितम् ॥"
शार्ङ्गधनुषः प्रमाणमाह हरत्-शार्ङ्गधरे ।
"शार्ङ्गं पुनर्धनुर्दिव्यं तद्विष्णोः परमायुधम् ।
वितस्तिसप्तमं मानं निर्म्मितं विश्वकर्म्मणा ॥
न स्वर्गे न च पाताले न भूमौ कस्यचित् करे ।
तद्धनुर्वशमायाति ऋते कं पुरुषोत्तम् ॥
पौरुषेयन्तु यच्छार्ङ्गं बहुवत्सरशोभितम् ।
वितस्तिभिः सार्द्धषड् भिर्निर्मितं धनुषोऽधमम् ॥
प्रायो योग्यं धनुः शार्ङ्गं गजयोधाश्वसादिनाम् ।
रथिनाञ्च पदातीनां वांशं चापं प्रकीर्त्तितम् ॥"
वांशधनुषः प्रमाणमाह तत्रैव ।
"त्रिपर्व्व पञ्चपर्व्व वा सप्तपर्व्व प्रकीर्त्तितम् ।
नवपर्व्वञ्च कोदण्डं चतुर्द्धा शुभकारणम् ॥
चतुष्पर्व्वञ्च षट्पर्व्वं अष्टपर्व्वं विवर्ज्जयेत् ॥"
"अतिजीर्णमपक्वञ्च ज्ञातिदुष्टं तथैव च ।
दग्धं छिद्रं न कर्त्तव्यं बाह्याभ्यन्तरहस्तकम् ॥
गुणहीनं गुणाक्रान्तं वास्तुदोषसमन्वितम् ।
गलग्रन्थिनं कर्त्तव्या तलमध्ये तथैव च ॥"
"अपक्वं भङ्गमायाति अतिजीर्णन्तु कर्कशम् ।
ज्ञातिदुष्टन्तु सोद्वेगं कलहो बान्धवैः सह ॥
दग्धेन दह्यते वेश्म छिद्रं युद्धविनाशनम् ।
बाह्ये लक्ष्यं न लभ्येत तथैवाभ्यन्तरेऽपि च ॥
हीने तु सन्धिते वाणे संग्रामे भङ्गकारकम् ।
आक्रान्ते च पुनः क्वापि न लक्ष्यं प्राप्यते दृढ़म् ॥"
"गलग्रन्थितलग्रन्थिधनहानिकरं धनुः ।
एभिर्दोषैर्विनिर्मुक्तं सर्व्वकार्य्यकरं स्मृतम् ॥"
उपलक्षेपकधनुषः प्रकारमाह तत्रैव ।
"उपलक्षेपकं चापं वैणवं तद्धिरज्जुकम् ।
त्रिहस्तोत्सेधसहितं द्व्यङ्गुलीविस्तृतं तु तत् ॥"
आसनविशेषः । यथा, हठयोगप्रदीपिकायाम् । १ । २५ ।
"पादाङ्गुष्ठौ तु पाणिभ्यां गृहीत्वा श्रवणावधि ।
धनुराकर्षणं कुर्य्याद्धनुरासनमुच्यते ॥"*॥
चतुर्हस्तपरिमाणम् । काठा इति भाषा । यथा,
"चतुर्विंशत्यङ्गुलो हस्तश्चतुर्भ्यं धनुः स्मृतम् ।"
इति जलाशयतत्त्वम् ॥
मेषादिद्वादशराश्यन्तर्गतनवमराशिः । तत्पर्य्यायः । तौक्षिकः २ । इति दीपिका । अस्य देवता पूर्व्वार्द्धमनुष्याकारपश्चार्द्धाश्वाकारधनुर्धारी पुरुषः । स मूलापूर्व्वाषाढ़ासमुदायोत्तराषाढ़प्रथमपादेन भवति । स च शीर्षोदयः पीतः स्वर्णवर्णो वा पर्व्वतचरः महाशब्दकरः पूर्व्वदिक्स्वामी दृढ़ाङ्गः रूक्षः क्षत्रियवर्णः उग्रः पित्तप्रकृतिरग्निवर्धः अल्पसन्तानः अल्पस्त्रीसङ्गः अग्निराशिः ॥ * ॥ एतद्राशिजातफलं यथा, "क्रोधी हतवाक् पुण्यमतिः शुचिः प्राज्ञः सुखी सर्व्वलोकालापी च ॥" इति जातकचन्द्रिकादयः ॥ * ॥ अपि च ।

"बहुकलाकुशलः प्रबलो महान्
विमलताकलितः सरलोक्तिभाक् ।
प्रभवति हि धनुर्धरो नरो
धनकरो न करोति धनव्ययम् ॥"

तल्लग्नजातफलं यथा,—
"धनुर्लग्ने समुत्पन्नो नीतिमान् धनवान् सुखी ।
कुलमध्ये प्रधानश्च प्राज्ञः सर्व्वस्य पोषकः ॥"
इति कोष्ठीप्रदीपः ॥

धनुःपटः, पुं, (धनुष इव पटो विस्तारो यस्य ।) पियालवृक्षः । इति शब्दचन्द्रिका ॥ (पर्य्यायोऽस्य यथा,—
"पियालस्तु खरस्कन्धश्चारो बहुलवल्कलः ।
राजादनस्तापसेष्टः सन्नकद्रुर्धनुःपटः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

धनुःशाखा, स्त्री, (धनुरिव शाखा यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

धनुःश्रेणी, स्त्री, (धनुषः श्रेणीव ।) मूर्व्वा । महेन्द्रवारुणी । इति राजनिर्घण्टः ॥ (यथास्याः पर्य्यायो वैद्यकरत्नमालायाम् ।
"तेजनी पिलुनी देवा तिक्तवल्ली पृथक्त्वचा ।
धनुःश्रेणी मधुरसा मूर्व्वा निर्दहनीति च ॥")

धनुर्गुणा, स्त्री, (धनुषो गुणो यस्याः ।) मूर्व्वा । इति शब्दचन्द्रिका । (मूर्व्वाशब्देऽस्या गुणादयो ज्ञातव्याः ॥)

धनुर्द्रुमः, पुं, (धनुषो द्रुमः ।) वंशः । इति राजनिर्घण्टः ॥

धनुर्धरः, पुं, (धरतीति । धृ+अच् । धनुषो धरः ।) धनुर्धारी । तिरन्दाज इति भाषा । तत्पर्य्यायः । धन्वी २ धनुष्मान् ३ धानुष्कः ४ निषङ्गी ५ अस्त्री ६ तूणी ७ धनुर्भृत् ८ । इति हेमचन्द्रः । ३ । ४३५ ॥ (यथा, महाभारते । १ । १३४ । २७ ।
"प्रयतिष्ये तथा कर्त्तुं यथा नान्यो धनुर्धरः ।
त्वत्समो भविता लोके सत्यमेतत् ब्रवीमि ते ॥"
स्वनामख्यातो धृतराष्ट्रस्य पुत्रविशेषः । यथा, महाभारते । १ । ११७ । ११ ।
"कवची निषङ्गी कुण्डी च कुण्डधारी धनुर्धरः ॥")

धनुर्धारी, [न्] त्रि, (धनुर्धरतीति । धृ+णिनिः ।) धनुर्धरः । तस्य लक्षणं यथा,—
"शूरश्च बलयुक्तश्च गजाश्वरथकोविदः ।
धनुर्धारी भवेद्राज्ञः सर्व्वक्लेशसहः शुचिः ॥"
इति मत्स्यपुराणे १८९ अः ॥

धनुर्भृत्, पुं, (धनुर्बिभर्त्तीति । भृ+क्विप् ।) धनुर्धरः । इति हेमचन्द्रः । ३ । ४३५ ॥ (यथा, रघुः । ९ । ११ ।
"अवनिमेकरथेन वरूथिना
जितवतः किल तस्य धनुर्भृतः ॥")

धनुर्मध्यं, क्ली, (धनुषो मध्यम् ।) चापमध्यभागः । तत्पर्य्यायः । लस्तकः २ । इत्यमरः ।२।८।८५॥

धनुर्माला, स्त्री, (धनुषो माला श्रेणीव ।) मूर्व्वा । इति शब्दचन्द्रिका ॥

धनुर्यासः, पुं, (धनुरिव यासः ।) धन्वयासः । दुरालभा । इत्यमरटीकायां रायमुकुटः ॥ (पर्य्यायोऽस्य यथा, वैद्यकरत्नमालायाम् ।
"यासो यवासो दुस्पर्शो धनुर्यासो दुरालभा ॥")

धनुर्लता, स्त्री, (धनुषो लतेव ।) सोमवल्ली । इति राजनिर्घण्टः ॥

धनुर्वृक्षः, पुं, (धनुषो वृक्षः ।) धन्वनवृक्षः । (अस्य पर्य्यायो यथा, वैद्यकरत्नमालायाम् ।
"धन्वनः पिच्छिलत्वक् च धनुर्वृक्षश्च धर्म्मणः ॥")
वंशः । भल्लातकः । अश्वत्थः । इति राजनिर्घण्टः ॥

धनुर्व्वेदः, पुं, (धनूंषि उपलक्षणेन धनुरादीन्यस्त्राणि विद्यन्ते ज्ञायन्तेऽनेनेति । विद्+करणे घञ् ।) धनुर्व्विद्याबोधकशास्त्रम् । तत्तु यजुर्व्वेदस्योपवेदः । इति चरणव्यूहः ॥ (यथा, मधुसूदनसरस्वतीकृतप्रस्थानभेदे ।
"यजुर्व्वेदस्योपवेदो धनुर्व्वेदः पादचतुष्टयात्मको विश्वामित्रप्रणीतः । तत्र प्रथमो दीक्षापादः । द्वितीयः संग्रहपादः । तृतीयः सिद्धिपादः । चतुर्थः प्रयोगपादः । तत्र प्रथमे पादे धनुर्लक्षणमधिकारिनिरूपणञ्च कृतम् । तत्र धनुःशब्दश्चापे रूढ़ोऽपि चतुर्विधायुधवाचको वर्त्तते । तच्च चतुर्विधम् । मुक्तममुक्तं मुक्तामुक्तं यन्त्रमुक्तञ्च । तत्र मुक्तं चक्रादि । अमुक्तं खड्गादि । मुक्तामुक्तं शल्यावान्तरभेदादि । यन्त्रमुक्तं शरादि । तत्र मुक्तमस्त्रमित्युच्यते । अमुक्तं शस्त्रमित्युच्यते । तदपि ब्राह्मवैष्णवपाशुपतप्राजापत्याग्नेयादिभेदादनेकविधम् । एवं साधिदैवतेषु समन्त्रेषु चतुर्विधायुधेषु येषामधिकारः क्षत्रियकुमाराणां तदनुयायिनाञ्च ते सर्व्वे चतुर्विधाः । पदातिरथगजतुरगारूढ़ाः । एवं दीक्षाभिषेकशाकुनमङ्गलकरणादिकञ्च सर्व्वमपि प्रथमे पादे निरूपितम् । सर्व्वेषामस्त्रशस्त्रविशेषाणां आचार्य्यस्य लक्षणपूर्व्वकं संग्रहणं संग्रहपादे द्वितीये दर्शितम् । गुरुसम्प्रदायसिद्धानां शस्त्रविशेषाणां पुनः पुनरभ्यासो मन्त्रदेवतासिद्धिकरणादिकं तृतीये पादे । एवं देवतार्च्चनाभ्यासादिभिः सिद्धानां अस्त्रशस्त्रविशेषाणां प्रयोगश्चतुर्थे पादे निरूपितः ॥")

धनुष्करः, पुं, (धनुः करोतीति । धनुस्+कृ+"दिवाविभेति ।" ३ । २ । २१ । इति टः ।) धनुः करे यस्य इति व्यधिकरणबहुव्रीहिसमासो वा । धानुष्कः ॥

धनुष्पटः, पुं, (धनुष इव पटो विस्तारो यस्य ।) पियालवृक्षः । इत्यमरः । २ । ४ । ३५ ॥

धनुष्मान्, [त्] पुं. (धनुर्विद्यते यस्य । धनुस्+मतुप् ।) धनुर्धरः । इत्यमरः । २ । ८ । ६९ ॥